अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 4 मुद्रितपृष्ठानि च सन्ति।

अनुक्रमाङ्क | | | | | | | | | | | | |

गुढ संख्या **62/SS/N**

सेट **A**

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (347)

**परीक्षादिनं दिनाङ्कश्च** ______________________

**निरीक्षकयोः हस्ताक्षरम्** 1. ______________________

2. ______________________

---

**सामान्य निर्देशाः –**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या **62/SS/N-A** नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (347)

समय : 3 घण्टे ] [ पूर्णांक : 100

**निर्देशा:** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5** इति आहत्य **35** प्रश्ना: सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्का: × प्रश्ना: = पूर्णाङ्का:) इति एवम् अङ्कान् निर्दिशति।

(iii) समे प्रश्ना अनिवार्या:।

**[A] दशानां युक्तं विकल्पं चिनुत।** **1x10=10**

**1.** सांख्यदर्शनस्य प्रवर्तकस्य आचार्यस्य नाम किम्?

(क) गौतम: (ख) कणाद: (ग) कपिल: (घ) जैमिनि:

**2.** कस्मात् तत्त्वात् षोडशक: गण: समुत्पद्यते?

(क) प्रकृते: (ख) महत्तत्त्वात् (ग) अहङ्कारात् (घ) पुरुषात्

**3.** वेदान्तमते पदार्थानुमाने कति अवयवा: भवन्ति?

(क) त्रय: (ख) चत्वार: (ग) पञ्च (घ) षट्

**4.** अभावग्रहणाय वेदान्तिन: किं प्रमाणं स्वीकुर्वन्ति?

(क) प्रत्यक्षम् (ख) अनुमानम् (ग) अर्थापत्ति (घ) अनुपलब्धि

**5.** के अनुमानप्रमाणं न अङ्गीकुर्वन्ति?

(क) चार्वाका: (ख) वेदान्तिन: (ग) भाट्टा: (घ) बौद्धा:

**6.** वेदान्तमते सिद्धान्तपक्षे लक्षणाया: बीजं किम्?

(क) अन्वयानुपपत्ति: (ख) तात्पर्यानुपपत्ति: (ग) अर्थानुपपत्ति: (घ) शब्दानुपपत्ति

7. सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तिनां कः न्यायः प्रसिद्धः ?
(क) तृणारणिमणिन्यायः (ख) शाखाचन्द्रमसन्यायः
(ग) अध्यारोपापवादन्यायः (घ) तिलतण्डुलन्यायः

8. कस्याम् उपनिषदि तेजःप्रमुखा सृष्टिः प्रतिपाद्यते ?
(क) तैत्तिरीयोपनिषदि (ख) कठोपनिषदि
(ग) बृहदारण्यकोपनिषदि (घ) छान्दोग्योपनिषदि

9. अद्वैतवेदान्तस्य प्रवर्तकः कः ?
(क) मध्वाचार्यः (ख) शङ्कराचार्यः (ग) रामानुजाचार्यः (घ) वल्लभाचार्यः

10. विषयेभ्यो बाह्येन्द्रियाणां निग्रहः किमुच्यते।
(क) शमः (ख) दमः (ग) उपरतिः (घ) वैराग्यम्

**[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। 2x10=20**

1. मनसः ज्ञानकर्मेन्द्रियत्वं किमर्थम् ? 2

2. साख्यमते तत्त्वानां सृष्टिक्रमं संक्षेपेण लिखत। 2

3. वेदान्तमते कति व्यावर्तकम् ? कानि च तानि ? 1+1

4. का बुद्धिः ? किं च चित्तम् ? 1+1

5. पौरुषेयत्वं नाम किम् ? योग्यता नाम का ? 1+1

6. ब्रह्मणः तटस्थलक्षणप्रतिपादकं सूत्रं किम् ? वेदान्तपरिभाषायां ब्रह्मणः किं तटस्थलक्षणं प्रदत्तम् ? 1+1

7. अध्यस्तवस्तुनः उपादानकारणं किं भवति ? सर्वमपि कार्यं कुत्र अध्यस्तम् ? 1+1

8. जगतः परिणाम्युपादानकारणं किम् ? जगतः विवर्तोपादानकारणं किम् ? 1+1

9. किं तावत् श्रवणम् ? जीवस्य उपाधिः कः ? 1+1

10. किं नाम सञ्चितं कर्म ? प्रारब्धकर्मण क्षयः कथं भवति ? 1+1

**[C] दशानां अनतिदीर्घोत्तरैः समाधत्त।** **4x10=40**

1. लक्षणस्य लक्षणविषये लघुटिप्पणीं लिखत।

2. त्रिविधचैतन्यविषये लघुटिप्पणीं लिखत।

3. लक्षणायाः भेदविषये लघुटिप्पणीं लिखत।

4. अज्ञानस्य शक्तिद्वयं विव्रियताम्।

5. परिणामवादविषये विवर्तवादविषये च समासेन लिखत।

6. ब्रम्हपदस्य अर्थविषये लघुटिप्पणीम् लिखत।

7. अविद्यायाः भावरूपत्वविषये लघुटिप्पणीमेकां लिखत।

8. तत्त्वमसि इति महावाक्ये त्वम्-पदस्य वाच्यार्थः लक्ष्यार्थश्च कः इति आलोच्यताम्।

9. मनसः अनिन्द्रियत्वं किमर्थमिति सप्रमाणं विचारयत।

10. काम्यं निषिद्धं नित्यं नैमित्तिकं च कर्म समासेन वर्ण्यताम्।

**[D] पञ्च दीर्घोत्तरैः समाधेयाः।** **6x5=30**

1. सांख्यदर्शनमते पुरुषस्य बहुत्वसाधकाः हेतवः आलोच्यन्ताम्।

2. अद्वैतवेदान्त सृष्टिप्रसङ्गे अध्यारोपापवादौ वर्णनीयौ।

3. ब्रह्मणः तटस्थलक्षणं वैशद्येन प्रतिपाद्यताम्।

4. सविकल्पकं निर्विकल्पकं च समाधिं संक्षेपेण वर्णयत।

5. पञ्चकोशेषु यथेच्छं कोशद्वयं विस्तरेण आलोच्यताम्।

- o O o -